# MT

Seat No. | | | | | | | |

2018 .... .... 1100

**MT - SANSKRIT COMPOSITE (SECOND OR THIRD LANGUAGE) - SEMI PRELIM - I**
**PAPER - II**

**Time : 2 Hours** **(Pages 8)** **Marks : 50**

---

## प्रथमः विभागः - सुगमसंस्कृतम् ।

प्र.१ अ) चित्रं दृष्ट्वा नामानि लिखत । (५ तः ४) ४

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ |  | २ |  | ३ |  | ४ | कारवेल्लम्  | ५ |  |
| | | | | | | | | | |

प्र.१ आ) सङ्ख्याः अक्षरैः अङ्कैः वा लिखत । (३ तः २) २

१. ९६ -

२. सप्तपञ्चाशत्-

३. ४ -

प्र.१ इ) स्तम्भमेलनं कुरुत । (५ तः ४) २

| | अ | ब |
|---|---|---|
| १. | पादोन - द्विवादनम् | ०८:०० |
| २. | अष्टवादनम् | ०६:३० |
| ३. | सपाद - एकवादनम् | ०४:१० |
| ४. | सार्ध - षड्वादनम् | ०१:४५ |
| ५. | दशाधिक - चतुर्वादनम् | ०१:१५ |

प्र.१ ई) वासर - तालिकां पूरयत । (केऽपि २) २

| ________ गुरुवासरः | ← | अद्य ________ | → | ________ शनिवासरः |
|---|---|---|---|---|

## द्वितीयः विभागः - गद्यम् ।

**प्र.२ अ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

भारतस्य दक्षिणदिशि केरलप्रदेशे आलुवा नगरस्य समीपं 'कालडि' नाम ग्रामः । सः ग्रामः पूर्णानदीतीरे वर्तते । अत्र जगद्गुरोः शङ्कराचार्यस्य जन्म खिस्ताब्दे अष्टमे शतके अभवत् । तस्य पिता शिवगुरुः माता आर्याम्बा चास्ताम् । बाल्ये एव तस्य पिता शिवगुरुः दिवङ्गतः । तस्माद् मातैव पुत्रस्य पालनम् अकरोत् । पञ्चमे वयसि उपनीतः सः पठनार्थं गुरुमुपागच्छत् । तत्र वेद-वेदाङ्गानि, विविधशास्त्राणि च असाधारणवेगेन बालकोऽयम् अधीतवान् । पठनादिकं समाप्य शङ्करः गृहं प्रत्यागतवान् । गृहं प्राप्य मातृसेवाम् आरभत च । माता आर्याम्बा पुत्रस्य विवाहविषये सदैव चिन्तयति स्म । परन्तु मनसा वचसा कर्मणा च विरक्तः शङ्करः संन्यासार्थम् अनुमतिं प्रार्थयत । शङ्करस्य ऐहिकविषयेषु अरुचिं दृष्ट्वा आर्याम्बा चिन्तामग्ना जाता ।

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत ।** १

१) पठनादिकं समाप्य शङ्करः ...... प्रत्यागतवान् । (गृहं / नदीं)

२) ......... वयसि उपनीतः सः पठनार्थं गुरुम् उपागच्छत् । (पञ्चमे / दशमे)

**ख) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

आर्याम्बा चिन्तामग्ना जाता यतः ..........

(अ) शङ्करः ऐहिकविषयेषु अरुचिं प्रदर्शयत् ।

(ब) शङ्करः ऐहिकविषयेषु रुचिं प्रदर्शयत् ।

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

गुरुमुपगम्य शङ्करः किम् अधीतवान्?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

शङ्करः अतीव प्रज्ञावान् बालकः ।

**२. शब्दज्ञानम् । (३ तः २)**

**क) द्वे ल्यबन्त-अव्यये चित्वा लिखत ।** १

**ख) विशेषण-विशेष्य-मेलनं कुरुत ।** १

| विशेषणम् | विशेष्यम् |
|---|---|
| दिवङ्गतः | शङ्करः |
| चिन्तामग्ना | शिवगुरुः |
| | आर्याम्बा |

**ग) सन्धिविग्रहं कुरुत ।** १

१) चास्ताम् - .............. + आस्ताम् ।

२) बालकोऽयम् - बालकः + .............. ।

**प्र.२ आ) गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत ।**

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः । यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः । नक्रः झटिति तस्य पादम् अगृह्णात् । तदा शङ्करः उच्चैः आक्रोशत्। ''अम्ब ! त्रायस्व । नक्रात् त्रायस्व !'' आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत् । भयाकुला सा अपि रोदनम् आरभत । शङ्करः मातरम् आर्ततया प्रार्थयत - ''अम्ब, इतः परम् अहं न जीवामि । मरणात् पूर्वं संन्यासी भवितुम् इच्छामि । अधुना वा देहि अनुमतिम् ।'' चेतसा अनिच्छन्ती अपि विवशा माता अवदत् - ''वत्स, यथा तुभ्यं रोचते तथैव भवतु । इदानीमेव संन्यासं स्वीकुरु । मम अनुमतिः अस्ति'' इति। तत्क्षणमेव आश्चर्यं घटितम् । दैववशात् शङ्करः नक्राद् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत् ।

अनन्तरं शङ्करः मातरं संन्यासस्य महत्त्वम् अवाबोधयत् । संन्यासी न केवलम् एकस्याः पुत्रः। विशालं जगद् एव तस्य गृहम् । 'मातः, यदा त्वं स्मरिष्यसि तदा एव त्वत्समीपमागमिष्यामि' इति मात्रे प्रतिश्रुत्य सः गृहात् निरगच्छत् । ततः गोविन्दभगवत्पादानां शिष्यो भूत्वा सः सर्वाणि दर्शनानि अपठत् । तेभ्यः संन्यासदीक्षां गृहीत्वा वैदिकधर्मस्य स्थापनार्थं प्रस्थानम् अकरोत् ।

अष्टवर्षे चतुर्वेदी द्वादशे सर्वशास्त्रवित् ।
षोडशे कृतवान् भाष्यं द्वात्रिंशे मुनिरभ्यगात् ।।

**१. अवबोधनम् । ( ४ तः ३ )**

**क) उचितं कारणं चित्वा वाक्यं पुनर्लिखत ।** १

शङ्करः उच्चैः आक्रोशत् यतः ..........

(अ) सः नदीजले अमज्जत् ।

(ब) नक्रः तस्य पादम् अगृह्णात् ।

**ख) कः कं वदति ।** १

''यथा तुभ्यं रोचते तथैव भवतु ।''

**ग) पूर्णवाक्येन उत्तरं लिखत ।** १

शङ्करः कस्य शिष्यः अभवत् ?

**घ) वाक्यं पुनर्लिखित्वा सत्यम् /असत्यम् इति लिखत ।** १

शङ्करः स्नानार्थं यमुनानदीम् अगच्छत् ।

**२. जालरेखाचित्रं पूरयत ।** २




**प्र.२ इ) गद्यांशं पठित्वा माध्यमभाषया सरलार्थं लिखत । (२ तः १)** ४

१. (ततः प्रविशति विश्वामित्रः । नदीं प्रणम्य...)

विश्वामित्रः - कथं लङ्घनीयः प्रवाहो नदीनाम्, कथं रक्षितव्यं जनं गोधनं च ।।
कथं याचितव्यस्तरणाय मार्गः, कथं प्रार्थनीया शुभेच्छा नदीनाम् ।।

नदी (विपाट्) - कः खलु एषः मानवः ? अस्मान् किमर्थं वन्दते स्तौति च ? आर्य, किन्नामा भवान्? कस्माद् अस्मान् आह्वयति ?

२. (रङ्गमञ्चे - कीर्तनकारः कीर्तनं करोति, श्रोतृवृन्दः श्रवणे मग्नः ।)

कीर्तनकारः - गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धुकावेरि पृथिव्यां सन्निधिं कुरु ।।

ज्येष्ठमासे शुक्लपक्षे दशम्यां तिथौ गङ्गादशहरापर्वप्रारम्भः । अस्मिन् पर्वणि नदीपूजनं कर्तव्यम् ।

श्रोतृवृन्दः - नदीपूजनम् ? किमर्थं नदीपूजनम् ?

**प्र.२ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१) शङ्करेण संन्यासार्थं कथम् अनुमतिः लब्धा ?

२) मानवानां जीवनं नदीनां साहाय्येन कथं समृद्धं जातम् ?

**तृतीयः विभागः - पद्यम् ।**

**प्र.३ अ) पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत । (५ तः ४)**

> कं संजघान कृष्णः का शीतलवाहिनी गङ्गा ।
> के दारपोषणरताः कं बलवन्तं न बाधते शीतम् ।।
> वैद्यराज नमस्तुभ्यं यमराजसहोदर ।
> यमस्तु हरति प्राणान् त्वं तु प्राणान् धनानि च ।।

**क) पूर्णवाक्येन उत्तरं लिखत ।** १

कृष्णः कं जघान?

**ख) विशेषण-विशेष्य-मेलनं कुरुत ।** १

| | विशेषणम् | विशेष्यम् |
|---|---|---|
| १) | शीतलवाहिनी | वैद्यराज |
| २) | यमराजसहोदर | गङ्गा |
| | | कृष्णः |

**ग) जालरेखाचित्रं पूरयत ।** १




**घ) सम्बोधनान्तपदे चित्वा लिखत ।** १

**च) लकारं लिखत । - हरति -** १

**प्र.३ आ) श्लोकौ शुद्धौ पूर्णौ च लिखत ।** ४

१. अयं ............. वा ।।

२. रामाभिषेके ............. ठठं ठः ।।

**प्र.३ इ) माध्यमभाषया सरलार्थं लिखत । (२ तः १)** २

१. यथैव सकला नद्यः प्रविशन्ति महोदधिम् ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ॥

२. सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ॥

**प्र.३ ई) माध्यमभाषया उत्तरं लिखत । (२ तः १)** २

१. 'कं संजघान' इति श्लोकं स्पष्टीकुरुत ।

२. 'रामाभिषेके' इति श्लोकं स्पष्टीकुरुत ।

## चतुर्थः विभागः - लेखनकौशलम् ।

**प्र.४ निर्दिष्टाः कृतीः कुरुत । (३ तः २)**

**अ) उपपदविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत । (४ तः २)** २

१. रुच् →

२. नमः →

३. गम् - गच्छ् →

४. सह →

**आ) अनुवादं कुरुत । (४ तः २)** २

१. I am a farmer.

२. Cat is my favourite animal.

३. Painter draws a picture.

४. Fruits fall from the tree.

**इ) अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत । (४ तः २)** २

१. <u>नरः</u> सर्वदा सत्यं वदेत् ।

२. कृष्णः <u>मेघः</u> जलं वर्षति ।

३. <u>कृषकः</u> क्षेत्रे बीजानि वपति ।

४. भारते दण्डकं नाम <u>वनम्</u> अवर्तत ।

## पञ्चमः विभागः - भाषाभ्यासः ।

**प्र.५ अ) पृथक्करणम् ।**

**१. नामानि सर्वनामानि च पृथक्कुरुत । (५ तः ४)** २

( कृष्णः, तयोः, एकस्मात्, जनेभ्यः, नदी )

| नाम | सर्वनाम |
|---|---|
| | |

**२. क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत । (५ तः ४)** २

( कुर्वाणः, मथति, अयच्छत्, चलितवान्, रक्ष )

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

**प्र.५ आ) निर्दिष्टाः कृतीः कुरुत । (४ तः २)**

**१) सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत । (३ तः २)** २

१. सप्ताहस्य ............ संस्कृतवर्गः भवति । (त्रिवारं / तृतीयं)

२. भोजने ............ रसाः भवन्ति । (षष्ठः / षड्)

३. पौषमासः संवत्सरस्य ............ मासः । (दशः / दशमः)

**२) समासविग्रहानां समासनामभिः सह मेलनं कुरुत । (६ तः ४)** २

| | समासविग्रहाः | समासनामानि |
|---|---|---|
| १. | विविधाः वर्णाः । | उपपद - तत्पुरुषः समासः । |
| २. | क्षेत्रस्य पतिः । | इतरेतर - द्वन्द्वः समासः । |
| ३. | वनस्पतिं गतः । | अव्ययीभावः समासः । |
| ४. | बालकाः च बालिकाः च । | कर्मधारयः समासः । |
| ५. | दिने दिने । | द्वितीया - तत्पुरुषः समासः । |
| ६. | जलं ददाति इति । | षष्ठी - तत्पुरुषः समासः । |

**३) समानार्थकं - विरुद्धार्थकं शब्दं लिखत । (४ तः २)** २

१. हेम -      २. धनवान् ×

३. नदी -      ४. शीतम् ×

( मञ्जूषा - उष्णम्, निर्धनः, सुवर्णम्, तटिनी )

४) **योग्यं पर्यायं चिनुत । (३ तः २)** २

क. मया पुस्तकं पाठ्यते । (कर्तृवाच्यम् / कर्मवाच्यम्)

ख. भवान् संस्कृतं ......... ? (पाठयति / पाठयसि)

ग. एकः .............. आगतः । (नक्राः / नक्रः)

**शुभं भवतु ✌**